**United International Journal of Multidisciplinary Research**
ISSN: 3048-6726 (UIJMR) Impact Factor: 6.934 (SJIF)
An International Peer-Reviewed and Refereed Multidisciplinary Journal
www.uijmr.in Vol-3, Special Issue-II ,2026

# भारतीय संस्कृततः – भिन्नत्वे एकत्वम

**वै. बुज्जी**
संस्कृत उपन्यासक
पिठापुर राजाः प्रभुत्व कलाशाला (स्व), काकिनाड
Email: bujjiyadla91@gmail.com

1962 तमे वर्षे *सुसंहतभारतम्* आचार्य पुल्लेल श्रीरामचन्द्रुडु महोदयेन प्रलिखितम्। अस्मिन् ग्रन्थे षट् प्रकरणानि सन्ति।

महात्मा गांधी, जवाहरलाल नेहरू, वल्लभभाई पटेल, सुभाषचन्द्रबोस, विंस्टन चर्चिल इत्येते महोदयाः ग्रन्थे अस्मिन् प्रधानभूमिकां वहन्ति।

ग्रन्थे अस्मिन् भारतस्वातन्त्र्यसंग्रामः, उद्यमानः, भारतस्वातन्त्र्य संरक्षणम्, समैक्यभारतम् इत्येते अंशाः प्रधानतया प्रस्तुताः।

अस्य ग्रन्थस्य रचयिता पुल्लेल श्रीरामचन्द्रुडु महोदयः भारतसंग्रामसमये प्रत्यक्षसाक्षी बालकः एव। गांधी, नेहरू महोदयैः विरचितान् अनेकान् ग्रन्थान् पठित्वा प्रभावितः अयं कविः।

भारतस्वातन्त्र्योद्यमसंबन्धि संस्कृतनाटकमेकम् अरचयत्।
नाटके अस्मिन् कश्चन स्वार्थभूयनिष्ठाः विदेशीया भारतदेशे व्यापारार्थं प्रविश्य स्थानिकस्वाश्रयं प्राप्य तेषामधिकारस्थापनार्थं भारतीयसमाजे विविध राष्ट्राणां, प्रान्तानां, भाषाणां, कुलानां, मतानां च मध्ये तारतम्यान् सृजित्वा भारतीयमूलतत्त्वं परिवर्तयितुं यतन्ते।

"मत्रान्तो मद्भाषा मे वेषो मे कुलञ्च मे पक्षः।
इति सङ्कुचितचेतसः अमी विश्वभूतमतेषु भेदं कुर्वन्ति॥

लोकाः समस्ताः सुखिनो भवन्तु इति चिन्तनीयं सर्वदा॥"

किन्तु महात्मा गांधी, नेहरू, पटेल, संजीवरेड्डी, गोपालरेड्डी इत्यादयः स्वातन्त्र्योद्यमाः भारतीय औन्नत्यस्य संस्कृतेश्च मूलतत्त्वं 'भिन्नत्वे एकत्वम्' इति ज्ञात्वा तद् महोन्नतभावं समाजे स्थापयित्वा स्वातन्त्र्यसंग्रामं कृत्वा विश्वयवनिकायां भारतीयएकत्वस्य वैशिष्ट्यं स्थापयामासुः।

भारतदेशे सर्वथा निन्दनीयदुष्साहसा अपि इयं प्रवृत्तिः शान्तिप्रियाणामस्माकं भारतीयानां विशेषतः भवति इति उक्तवान् राधाकृष्णः।

नाटके अस्मिन् आचार्य पुल्लेल श्रीरामचन्द्रुडु महोदयः भारतदेशस्य वैशिष्ट्यं प्रकटितवान्।
भारतदेशे प्रत्येकः पौरः अतिथिसेवने विषये समुन्नतः।
विदेशान् आगतान् अतिथीन् सादर सत्कारेण आह्वयन्ति।
प्रत्येकः पौरः भारतीयऔन्नत्याय यतते।

पञ्चशील सिद्धान्तः

“सर्वं प्रकृतिमय्याधि विजित्यैवं नरः कथं यावत् मानसमेष न विजयी शान्तिः कुतः स्थापिताः।
ज्ञात्वैवं जगत्संग्रामघोरापदां धीराः रक्षिष्यन्ति सुमतं तत्पञ्चशीलं नुतम्॥”

इदं पञ्चशीलम्—

कुटुम्बेऽल्पेऽथवा ग्रामे पुरे देशे जगत्यहो।
सर्वत्रानुसृतं शान्तिसन्धानकुशलं भवेत्॥

आत्मोन्नत्यै यथा बुद्धस्याष्टमार्गसमं तथा।
पञ्चशीलञ्च भवेत् विश्वरक्षैककारणम्॥

भारतीय कार्यनिवर्हणे कुलमतानां प्रस्तावना नास्ति।
भारतीयस्य शान्तिकामकत्वाय संस्कृतेः प्रतीकं संस्कृतभाषा एव।

नेहरूवचनं श्रुत्वा अमात्याः संस्कृतभाषायाः महत्त्वं प्रकाशयन्ति।

केवलं संस्कृतभाषा सर्वदेशव्याप्ता, सर्वसंवृत्ता च।

“सा देवी कमलासनाननचारी यामादिनो व्याहरन्।
माता या च समस्तभारतभुवां भाषाङ्गनानामसौ।
वाणी कस्य नु न प्रियाऽपशुमतेः सा सर्वथा वर्धयताम्॥”